# मन्यु सूक्तम्

ऋग्वेद संहिता; मण्डलं 10; सूक्तं 83,84

यस्ते॑ म॒न्योऽ॒विधद् वज्र सायक॒ सह॒ ओजः॑ पुष्यति॒ विश्व॑मानु॒षक् ।
सा॒ह्याम॒ दास॒मार्यं॒ त्वया॑ यु॒जा सह॑स्कृतेन॒ सह॑सा॒ सह॑स्वता ॥ 1 ॥

म॒न्युरिन्द्रो॑ म॒न्युरे॒वास॑ दे॒वो म॒न्युर् होता॒ वरु॑णो जा॒तवे॑दाः ।
म॒न्युं विश॑ ईलते॒ मानु॑षी॒र्याः पा॒हि नो॑ मन्यो॒ तप॑सा स॒जोषाः॑ ॥ 2 ॥

अ॒भी॑हि मन्यो॑ त॒वस॒स्तवी॑या॒न् तप॑सा यु॒जा वि ज॑हि शत्रू॑न् ।
अ॒मि॒त्र॒हा वृ॑त्र॒हा द॑स्यु॒हा च॒ विश्वा॒ वसू॒न्या भ॑रा॒ त्वं नः॑ ॥ 3 ॥

त्वं हि म॑न्यो अ॒भिभू॑त्योजाः स्वय॒म्भूर्भामो॑ अभिमातिषा॒हः ।
वि॒श्वच॑र्-षणिः॒ सहु॑रिः॒ सहो॑वान॒स्मास्वोजः॒ पृत॑नासु धेहि ॥ 4 ॥

अ॒भा॒गः सन्नप॒ परे॑तो अस्मि॒ तव॒ क्रत्वा॑ तवि॒षस्य॑ प्रचेतः ।
तं त्वा॑ मन्यो अक्र॒तुर्जि॑हीला॒हं स्वात॒नूर्ब॑ल॒देया॑य॒ मेहि॑ ॥ 5 ॥

अ॒यं ते॑ अ॒स्म्युप॒ मेह्य॒र्वाङ् प्र॑तीची॒नः स॑हुरे विश्वधायः ।
मन्यो॑ वज्रि॒न्नभि मामा व॑वृत्स्वहना॑व॒ दस्यू॑न् ऋ॒त बो॑ध्या॒पेः ॥ 6 ॥

अ॒भि प्रेहि॑ दक्षिण॒तो भ॑वा॒ मेऽ॒धा वृ॒त्राणि॑ जङ्घनाव॒ भूरि॑ ।
जु॒होमि॑ ते ध॒रुणं॒ मध्वो॒ अग्र॑मुभा उ॑पा॒ंशु प्र॑थ॒मा पि॑बाव ॥ 7 ॥

त्वया॑ मन्यो स॒रथ॑मारु॒जन्तो॒ हर्ष॑माणासो धृषि॒ता म॑रुत्वः ।
ति॒ग्मेष॑व॒ आयु॑धा स॒ंशिशा॑ना अ॒भि प्रयं॑तु॒ नरो॑ अ॒ग्निरू॑पाः ॥ 8 ॥

अ॒ग्निरि॑व मन्यो त्विषि॒तः स॑हस्व सेना॒नीर्नः॑ सहु॒रे हू॒त ए॑धि ।
ह॒त्वाय॒ शत्रू॒न् वि भ॑जस्व॒ वेद॒ ओजो॒ मिमा॑नो॒ विमृधो॑ नुदस्व ॥ 9 ॥

सह॑स्व मन्यो अ॒भिमा॑तिम॒स्मे रु॒जन् मृ॒णन् प्र॑मृ॒णन् प्रेहि॒ शत्रू॑न् ।
उ॒ग्रं ते॒ पाजो॒ न॒न्वा रु॑रुध्रे व॒शी वशं॑ नयस एकज॒ त्वम् ॥ 10 ॥

एको॑ बहू॒नाम॑सि मन्यवीलि॒तो विशं॑विशं यु॒धये॒ सं शि॑शाधि ।
अकृ॑त्तरु॒क् त्वया॑ यु॒जा व॒यं द्यु॒मन्तं॒ घोषं॑ विज॒याय॑ कृण्महे ॥ 11 ॥

विजेषकृदिन्द्र इवानवब्रवो(ओ)3ऽस्माकं मन्यो अधिपा भवेह ।
प्रियं ते नाम सहुरे गृणीमसि विद्मातमुत्सं यत आबभूथ ॥ 12 ॥

आभूत्या सहजा वज्र सायक सहो बिभर्ष्यभिभूत उत्तरम् ।
क्रत्वा नो मन्यो सहमेद्येधि महाधनस्य पुरुहूत संसृजि ॥ 13 ॥

संसृष्टं धनमुभयं समाकृतमस्मभ्यं दत्तां वरुणश्च मन्युः ।
भियं दधाना हृदयेषु शत्रवः पराजितासो अप निलयन्ताम् ॥ 14 ॥

धन्वनागाधन्व नाजिञ्जयेम धन्वना तीव्राः समदो जयेम ।
धनुः शत्रोरपकामं कृणोति धन्व नासर्वाः प्रदिशो जयेम ॥

भद्रं नो अपि वातय मनः ॥

ॐ शान्ता पृथिवी शिवमन्तरिक्षं द्यौर्नो देव्यभयन्नो अस्तु ।
शिवा दिशः प्रदिश उद्दिशो नऽआपो विश्वतः परिपान्तु सर्वतः शान्तिः शान्तिः शान्तिः ॥

Web Url: http://www.vignanam.org/veda/manyu-suktam-devanagari.html